# संस्कृत-वार्ता:

**दिनाङ्क** :- 27/06/2025 **सायम्** :- 06:20

**आदौ-मुख्यवार्ता:**

- भारतेन स्थापितं तन्त्रं कायाकल्पं कृत्वा चीनदेशेन सह सीमानिर्धारणस्य स्थायी समाधानाय बलं प्रदत्तम्। सममेव द्वयोः राष्ट्रयोः मध्ये निर्मितस्य विश्वासघातं निवारणाय आह्वानं कृतम्।
- भारतेन रूसदेशेन सह एस-400 प्रणालीनां आपूर्तिः, एस.यू-30 एम.के.आई. उन्नयनं, समयसीमायां महत्त्वपूर्णसैन्य उपकरणानां क्रयणस्य च विषये चर्चा कृता अस्ति।
- अद्य ओडिशा राज्यस्य पुरी-नगर्यां भगवतः जगन्नाथस्य विश्व-प्रसिद्धः वार्षिकी रथयात्रा समारब्धा।
- अमेरिकीय राष्ट्रपति: डॉनल्ड ट्रम्प: उक्तवान् यत् भारतेन सह अतीव महत्वपूर्णं सन्धिज्ञापनं शीघ्रमेव भविष्यति।
- भारतीय ऋतु-विभागेन आगामिषु द्वि - त्रि दिवसेषु सम्पूर्णे देशे प्रावृटागमनस्य अनुमानं कृतमस्ति।

-----------------------------------------------------

**राजनाथ - चीन**

भारतेन स्थापितं तन्त्रं कायाकल्पं कृत्वा चीनदेशेन सह सीमानिर्धारणस्य स्थायी समाधानाय बलं प्रदत्तं तथा च विंशत्यधिक द्विसहस्रतमे वर्षे सीमाविरोधस्यानन्तरं द्वयोः राष्ट्रयोः मध्ये निर्मितस्य विश्वासघातं निवारणाय आह्वानं कृतम्। नवदिल्ल्यां भारत-चीन-सीमायां शान्तिं सौहार्दं च स्थापयितुम्, स्थायी-सङ्गतिं-विस्तारस्य च संरचित-मार्गचित्रेण समस्यानां समाधानस्य आवश्यकताम् अपि उक्तम्। चीनदेशे शङ्घाईसहयोगसङ्गठनस्य (एससीओ) रक्षामन्त्रिणां उपवेशनस्य अनन्तरं रक्षामन्त्री राजनाथसिंहः चीन-देशीयेन स्वसमकक्षेन एड्मिरल् डोङ्ग जुन् इत्यनेन सह द्विपक्षीयोपवेशनं कृतम्। श्रीसिंहः द्विपक्षीयसम्बन्धेषु सामान्यता पुनः आनेतुं उभयपक्षाभ्यां क्रियमाणं कार्यं स्वीकृतवान्। रक्षामन्त्री स्वसमकक्षं सद्यःएव पहलगामे आतङ्क्याक्रमणस्य विषये, पाकिस्ताने आतङ्कवादीनां स्थानानां विध्वंसनम् उद्दिश्य भारतस्य सिन्दूराभियानस्य विषये च उक्तवान्।

---

**राजनाथ - रूसः**

भारतेन रूसदेशेन सह एस-400 प्रणालीनां आपूर्तिः, एस.यू-30 एम.के.आई. उन्नयनं, समयसीमायां महत्त्वपूर्णसैन्य उपकरणानां क्रयणस्य च विषये चर्चा कृता अस्ति। चीनदेशस्य किङ्गदाओ-नगरे शङ्घाईसहयोगसङ्गठनस्य (एससीओ) रक्षामन्त्रिणां उपवेशनावधौ रक्षामन्त्रिणः राजनाथसिंहस्य रूसीसमकक्षेन आन्द्रे बेलोसोवेन सह द्विपक्षीयोपवेशनम् अभवत्। मन्त्रिणौ वर्तमानभूराजनीतिकस्थितयः, सीमापार-आतङ्कवादः, भारत-रूस-रक्षासहयोगं च समेत्य अन्येषु विषयेषु गहनविमर्शं कृतवन्तौ। अस्मिन् उपवेशने रूस देशस्य रक्षामन्त्री दीर्घकालिक भारत-रूस-सम्बन्धानां प्रकाशनं कृत्वा, पहलगाम-आतङ्क-आक्रमणस्य विषये भारतेन सह एकतां प्रकटितवान्।

---

**जयशंकर-एससीओ**

विदेश मंत्री डॉ. एस.जयशङ्करेण उक्तं यत् भारतेन चीनदेशे शङ्घाई सहयोग सङ्गठनस्य रक्षामन्त्रिणां उपवेशनस्य संयुक्त प्रतिवेदनं न हस्ताक्षरितम्। यतोहि तत् प्रतिवेदने आतङ्कवादस्य सन्दर्भः समाविष्टः न आसीत्। नवदिल्ल्यां वार्ताहरैः सह सम्भाषणं कुर्वन् डॉ. जयशङ्करः प्रोक्तवान् यत् शङ्घाई सहयोग सङ्गठनस्य निर्माणं आतङ्कवादस्य उद्देश्यं कृत्वा निर्मितम्। सः अवदत् यत् रक्षामन्त्री राजनाथसिंहः स्पष्टतया उक्तवान् यत् यदि संयुक्त प्रतिवेदने आतङ्कवादस्य उल्लेखः न भविष्यति तर्हि भारतं हस्ताक्षरं नैव करिष्यति।

---

**जगन्नाथ- रथयात्रा**

ओडिशा राज्यस्य पुरी-नगर्यां भगवतः जगन्नाथस्य विश्व-प्रसिद्धः वार्षिकी रथयात्रा अद्य आरभते। मन्यते यत् जून जुलाई मासयोः संजायमाणे प्रसिद्धे उत्सवे भगवान जगन्नाथः तस्य अग्रजः बलभद्रः, कनिष्ठः भगिनी च देव्याः सुभद्रायाः विग्रह-रथेषु आरूह्य दर्शनं प्रददति। सममेव मातृस्वसायाः गृहं गुंडिचा मन्दिरं गन्तुं सज्जाः कुर्वन्ति। ते गुंडिचा मन्दिरे नवदिनानि यावत् प्रवासं अपि कुर्वन्ति। मन्दिरप्रशासनस्यानुसारं अस्मिन् वर्षे उत्सवे प्रायः त्रयोदशलक्षमिताः भक्ताः भागं ग्रहीष्यन्ति ।

---

**ट्रम्प व्यापार संधि**

अमेरिकीय राष्ट्रपतिः डॉनल्ड ट्रम्पः उक्तवान् यत् भारतेन सह अतीव महत्वपूर्णं सन्धिज्ञापनं शीघ्रमेव भविष्यति। राष्ट्रपतिः अवदत् यत् अमेरिका चीनदेशेन सह सन्धिं कृतवान् अस्ति। ह्यः एकस्मिन् कार्यक्रमे प्रवदन् श्रीट्रम्पः अवदत् यत् ते चीनदेशेन सह अधुना एव सन्धिं कृतवन्तः। भारतेन सहापि शीघ्रमेव एकः बृहत् सन्धि-ज्ञापनं भविष्यति। अन्यैः राष्ट्रैः सह सन्धयः न भविष्यन्ति इति ट्रम्पः प्रतिपादितवान् । ध्यातव्य मस्ति यत् चीनदेशेन सह कृतस्य संधेः विवरणं ट्रम्पेन न प्रदत्तम्।

---

**भारतीय ऋतु-विभागः**

भारतीय ऋतु-विभागेन आगामिषु द्वि - त्रि दिवसेषु सम्पूर्णे देशे प्रावृटागमनस्य अनुमानं कृतमस्ति । ऋतुविज्ञान विभागेन सौराष्ट्रे कच्छ नगर्योः च अत्यन्तं प्रचण्डवृष्टेः संभावना प्रकटिता। आकाशवाण्याः वार्ताहरैः सह परिचर्चां कुर्वन् भारतीय ऋतुविज्ञान विभागस्य वैज्ञानिकः नरेश कुमारः अवदत् यत् अद्य देशस्य पश्चवर्तिषु क्षेत्रेषु अतीव प्रचण्डवृष्टेः संभावना वर्तते।

हिमाचलप्रदेशे विगतेषु दिवसेषु सञ्जाते प्रचण्ड वृष्टेः अनन्तरं राजधान्यां शिमलायां अपि च राज्यस्य विभिन्नेषु भागेषु सघन मेघाः आच्छादिताः आसन्। तथापि केभ्यः स्थानेभ्यः लघुवृष्टेः सूचनाः प्राप्ताः सन्ति । तत्रत्य प्रचण्डवृष्ट्या , जलप्लावन कारणेन च अष्ट-जनाः मृताः। अपि च, द्वौ राष्ट्रियराजमार्गौ, द्वौ जलविद्युत्प्रकल्पौ च क्षतिग्रस्तौ सञ्जातौ। हिमाचलप्रदेशस्य कांगड़ा जनपदस्य खनियारानगरस्य मनुनी नालिकातः पञ्च शवः प्राप्ताः सन्ति। यत्र आकस्मिकजलप्रलयेन अष्ट-श्रमिकाः जलव्याप्ताः आसन्। त्रयः जनाः अधुनापि लुप्ताः इति ज्ञापिताः सन्ति। तत्रत्य जनान् अन्वेष्टुं सहाय्योद्धाराभियानं प्रचलति । ऋतुविज्ञान विभागेन अद्य श्वः च वर्षायाः कृते पीत संचेतना प्रसारिता। मुख्यमन्त्री ठाकुर-सुख-विंदर-सिंह-सुक्खूः सर्वान् उपायुक्तान् अस्मिन् ऋतौ प्रतिकूलसमयावधौ सक्रियतां संधारणस्य निर्देशाः प्रदत्ताः।

---

**जम्मू-कश्मीर**

जम्मू-कश्मीरस्य उधमपुर नगरस्य एकस्मिन् वन्यक्षेत्रे अद्य प्रातः पाकिस्तानस्य जैश-ए-मोहम्मद इत्यस्य गुल्मस्य त्रयः आतङ्कवादिनः निगडितुं सुरक्षा-बलानाम् अन्वेषणकार्यक्रमं आरब्धमस्ति। ह्यः सुरक्षाबलेन सह संघर्षे एकः आतङ्कवादी मारितः। तस्य त्रयाणां सहचराणां बसन्तगढ़स्य वन्यक्षेत्रे निगडनं न सञ्जातम्। तत्रत्य सुरक्षाबलैः सम्पूर्णे क्षेत्रे अन्वेषण-कार्यक्रमः अद्यापि प्रचलति एव।

**।। इति वार्ता: ।।**